4. एच इग्घ्रस्वादेशे
5. षष्ठी स्थानेयोगा
6. स्थानेऽन्तरतमः
7. उरण् रपरः
8. अलोन्त्यस्य
9. ङिच्च
10. आदेः परस्य
11. अनेकालशित्सर्वस्य

## अष्ठमाह्निके

1. स्थानिवदादेशोऽनल्विधौ
2. अचः परस्मिन् पूर्वविधौ
3. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चविधिषु
4. द्विर्वचनेऽचि

## नवमाह्निके

1. अदर्शनं लोपः
2. प्रत्ययस्य लुक्श्लुलुपः
3. प्रत्ययलोपे प्रत्ययलक्षणम्
4. न लुमताऽङ्गस्य

**(आपत्तिप्रश्नभाष्यम्)**

किं च स्यात् यद्यत्र रपरत्वं स्यात्?॥

**(आपत्तिदर्शनभाष्यम्)**

द्वयो रेफयोः श्रवणं प्रसज्ये।

**(आपत्तिबाधकभाष्यम्).**

''हलो यमां यमि लोपः''इत्येवमेकस्यात्र लोपो भविष्यतीति॥

**(आपत्तिसाधकभाष्यम्)**

विभाषा स लोपः, विभाषाश्रवणं प्रसज्येत॥

**(आपत्तिबाधकभाष्यम्)**

अयं तर्हि नित्यो लोपः ''रो रि'' इति॥

**(आपत्तिसाधकभाष्यम्)**

'पदान्तस्य' इत्येवं सः॥

**(आपत्तिबाधकभाष्यम्)**

न शक्यः स पदान्तस्य इत्येवं विज्ञातुम्। इह हि लोपो न स्यात्, जर्गृघेर्लड्अजर्घाः, -पास्पर्द्धेः अपास्पाः इति॥

**(आपत्तिसाधकभाष्यम्)**

इह तर्हि-मातृ पितॄणामिति रपरत्वं प्रसज्येत॥

**(आपत्तिबाधकभाष्यम्)**

आचार्यप्रवृतिर्ज्ञापयति-नात्र रपत्वं भवतीति। यदयम् ''ॠत इद्धातोः'' इति धातुग्रहणं करोति॥

**(द्वितीयप्रयोजनोपपादनभाष्यम्)**

सन्ध्यक्षरनिवृत्त्यर्थम्-ग्लायति म्लायति। सन्ध्यक्षरस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति॥

**(तृतीयप्रयोजनोपपादनभाष्यम्)**

व्यञ्जनिवृत्त्यर्थम्-उम्भिता उम्भितुम् उम्भितव्यम्। व्यजञ्नस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति॥

**(प्रथमप्रयोजननिराकरणभाष्यम्)**

आकारनिवृत्त्यर्थेन तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति-नाकारस्य गुणो भवतीति। यदयम् ''आतोऽनुपसर्गे कः'' इति ककारमनुबन्धं करोति॥

कथं कृत्वा ज्ञापकम्? ॥

कित्करण एतत्प्रयोजनम्-कितीत्याकारलोपो यथा स्याद्। यदि चाकारस्य गुणः स्यात्, कित्करणगमनर्थकं स्याद्। गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्याद्-गोदः कंबलद इति। पश्यति त्वाचार्यो-नाकारस्य गुणो भवतीति, ततः ककारमनुबन्धं करोति॥

**(द्वितीप्रयोजननिराकरणभाष्यम्)**

सन्ध्यक्षरनिवृत्त्यर्थेनापि नार्थः। उपदेशसामथ्यात्सन्ध्यक्षरस्य गुणो न भवति॥

**(तृतीयप्रयोजननिराकरणभाष्यम्)**

व्यञ्जननिवृत्त्यर्थेनापि नार्थः। आचार्यप्रवृतिर्ज्ञापयति- न व्यञ्जनस्य गुणो भवतीति। यदयं जनेर्डं शास्ति॥

कथं कृत्वा ज्ञापकम्? ॥

**(अथ स्वतन्त्रविधित्वनिराकरणाधिकरणम्)**

**(११४ आक्षेपवार्तिकप्रथमखण्डम्॥ १२॥)**

**॥ *॥ षष्ठ्याः स्थानेयोगत्वादिग्निवृत्तिः॥* ॥**

**(भाष्यम्)**

षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति दधि मधु॥

**(अस्य स्वतन्त्रत्वे दूषणभाष्यम्)**

पुनर्वचनमिदानीं किमर्थं स्यात्?॥

**(११४ स्वतंत्रत्वे दूषणसमाधानवार्तिक२ खण्डम्॥ १३॥)**

**॥ ॥ अन्यतरार्थं पुनर्वचनम्॥॥**

**(भाष्यम्)**

अन्यतरार्थमेतत्स्यात्-सार्वधातुकार्धधातुकयोर्गुण एवेति॥

**(११५ आक्षेपवार्तिकप्रथमखण्डम्)**

**॥*॥ प्रसारणे च ॥*॥**

**(भाष्यम्)**

प्रसारणे च सर्वेषां यणां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति-याता वाता॥

**(स्वातन्त्र्ये दूषणभाष्यम्)**

पुनर्वचनमिदानीं किमर्थं स्यात्? ॥

**(११५ स्वातन्त्र्ये दूषणनिराकरणवार्तिक 2 खण्डम्॥ १५॥)**

**॥*॥ विषयार्थं पुनर्वचनम् ॥*॥**

(इति तपरप्रयोजननिरूपणम्)

*********

(अथ द्विवचनविशेषणताविचारभाष्यम्)

कथं पुनरिदं विज्ञायते-ईदादयो यद् द्विवचनम्, आहोस्विदीदाद्यन्तं यद्द्विवचनमिति॥

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः?॥

(१५० प्रथमपदे दोषप्रदर्शकवार्तिकम् ॥१॥)

॥*॥ ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः॥*॥

(भाष्यम्)

ईदादयो द्विवचनं प्रगृह्या इति चेद् अन्त्यस्य प्रगृह्यसंज्ञा विधेयाःपचेते इति, पचेथे इति॥

(दूषणबाधकभाष्यम्)

वचनाद्भविष्यति॥

(दूषणसाधकभाष्यम्)

अस्ति वचने प्रयोजनम् ॥

किम्?।

खट्वे इति, माले इति॥

(दूषणबाधकद्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि-ईदाद्यन्तं यद्द्विचनम्-इति।

(१५१ द्वितीयपक्षे दूषणवार्तिकम् ॥१॥)

यदयम् 'ईदूतौ च सप्तम्यर्थे' इत्यर्थग्रहणं करोति, तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति॥

**(आक्षेपभाष्यम्)**

तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम् ॥

**(समाधानभाष्यम्)**

न कर्तव्यम् ।ईदादिभिर्द्विवचनं विशेषयिष्यामः, ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति- ईदाद्यन्तं यद् द्विवचनं तदन्तमीदाद्यन्तम्-इति॥

**(आक्षेपभाष्यम्)**

एवमप्यशुक्ले वस्त्रे शुक्ले सम्पद्येतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्राप्नोति। अत्र हीदादि च द्विवचनं तदन्तं च भवति प्रत्ययलक्षणेन॥

**(समाधानभाष्यम्)**

अत्राप्यकृते शीभावे लुग्भविष्यति॥

**(आक्षेपसाधकभाष्यम्)**

इदमिह संप्रधार्यं लुक् क्रियतां, शीभाव इति॥

किमत्र कर्तव्यम्?।

परत्वाच्छीभावः॥

**(समाधानसाधकभाष्यम्)**

नित्यो लुक्। कृते शीभावे प्राप्नोत्यकृतेऽपि प्राप्नोति॥

**(आक्षेपसाधकभाष्यम्)**

**(योगविभागाधिकरणम्)**

**(१६६[1] सिद्धान्तआक्षेपवार्तिकम् ॥१॥)**

**॥*॥ उञ इति योगविभागः॥*॥**

**(भाष्यम्)**

उञ इति योगविभागः कर्तव्यः। "उञः" शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति। उइति विति॥ ततः "ऊँ" उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च। ऊँ इति॥

**(योगविभागवैयर्थ्यभाष्यम्)**

किमर्थो योगविभागः?॥

**(१६६[2] आक्षेपप्रयोजनवार्तिक्यखण्डनम् ॥१॥)**

**॥*॥ ऊँ वा शाकल्यस्य॥*॥**

**(भाष्यम्)**

शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात्। ऊँ इति उ इति। अन्येषामाचार्याणां मतेन-विति॥ उ ञ ऊँ ॥१७॥

----------------

**(१६ प्रगृह्यसंज्ञासूत्रम्॥१।१।५॥ आ. ७॥)**

**ईदूतौ च सप्तमर्थे॥१।१।१८॥**

**(अर्थग्रहणप्रयोजननिरूपणाधिकरणम्)**

**(१६७ आक्षेपवार्तिकम् ॥१॥)**

घुसंज्ञा कस्मान्न भवति?॥

(समाधानभाष्यम्)

“सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य” इत्येवं न भविष्यति॥

(नानुबन्धकृतमनेजन्तत्वन्यायाधिकरणम्)

(१८० आक्षेपवार्तिकम् ॥१॥)

॥*॥ दाप्प्रतिषेधे न दैप्यनेजन्तत्वात् ॥*॥

(भाष्यम्)

दाप्प्रतिषेध दैपि प्रतिषेधो न प्राप्नोति-अवदात्तं मुखम् ॥

ननु चाऽऽत्त्वे कृत्ते भविष्यति॥

तद्वयात्त्वं न प्राप्नोति॥

किं कारणम्?॥

अनेजन्तत्वात्॥

(१समाधानवार्तिकम् ॥२॥)

॥*॥सिद्धमनुबन्धस्याऽनेकान्तत्वात् ॥*॥

(भाष्यम्)

सिद्धमेतत् ॥

कथम्?॥

अनुबन्धस्यानेकान्तत्वात् । अनेकान्ता अनुबन्धाः॥

(१८२ समाधानवार्तिकम् ॥३॥)

अकृत्रिमत्वात् । बह्वादीनां कृत्रिमा संज्ञा। ''कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति''॥ यथा लोके॥ तद्यथा-लोके-'गोपालकमानय' 'कटजकमानय' इति यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः॥

**(आक्षेपभाष्यम्)**

यदि तर्हि कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति ''नदीपौर्णमास्याग्रहायणीभ्यः'' इत्यत्रापि प्रसज्येत॥

**(समाधानभाष्यम्)**

पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति॥

**(आक्षेपभाष्यम्)**

तद्विशेषेभ्यस्तर्हि प्राप्नोति।

**(समाधानभाष्यम्)**

एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति'न तद्विशेषेभ्यो भवति' इति। यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति॥

**(आक्षेपभाष्यम्)**

इह तर्हि प्राप्नोति-'नदीभिश्च'' इति॥

**(समाधानभाष्यम्)**

बहुवचननिर्देशान्न भविष्यति॥

**(आक्षेपभाष्यम्)**

स्वरूपविधिस्तर्हि प्राप्नोति।

कथं पुनरिच्छताऽपि भवता बहिरङ्गेण प्रतिषेधेनान्तरङ्गो विधिः शक्यो बाधितुम्?॥

**(समाधानभाष्यम्)**

अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते गोमत्प्रिय इति यथा॥

**(दृष्टान्तवैषम्येण समाधानबाधकभाष्यम्)**

क्रियते तत्र यत्नः-'प्रत्ययोत्तरपदयोश्च' इति॥

**(दृष्टान्तसाम्येन समाधानसाधकभाष्यम्)**

ननु चेहापि क्रियते-'न बहुव्रीहौ' इति॥

**(वैयर्थ्यपरिहारेण समाधानबाधकभाष्यम्)**

अस्त्यन्यदेतस्य वचने प्रयोजनम् ॥

किम्?॥

प्रियविश्वाय॥

**(वैयर्थ्यस्थित्या समाधानसाघकभाष्यम्)**

उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम् ॥

**(मतान्तरेण सामाधानान्तरभाष्यम्)**

अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः। यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यम्-बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति। तद्यत्तादर्थ्याच्छब्द्यं तस्येदं ग्रहणम् ॥

**(प्रत्याख्यानभाष्यम्)**

गोनर्दीयस्त्वाह-

'अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ।'

अविशेषात् ॥ नहि कश्चिद्विशेष उपादीयते एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति॥ अनुपादीयमाने विशेषे सर्वप्रसङ्गः॥

**(३३७ समाधानवार्तिकम् ॥२॥)**

**॥*॥ न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम् ॥*॥**

**(भाष्यम्)**

न वा एष दोषः॥

किं कारणम्?।

ऋवर्णस्य स्थाने रपरप्रसङ्गात्। उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। तत्र ऋवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति॥

**(३३८ आक्षेपवार्तिकम् ॥३॥)**

**॥*॥ सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात् ॥*॥**

**(भाष्यम्)**

सर्वादेशस्तु गुणवृद्धिसंज्ञक ऋवर्णस्य प्राप्नोति॥

किं कारणम्?॥

अनेकाल्त्वात्। 'अनेकाल्शित्सर्वस्य' इति॥

**(३३९ समाधानवार्तिकम् ॥४॥)**

**॥*॥ न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः॥*॥**

**(भाष्यम्)**

न वा एष दोषः॥

कश्चात्र विशेषः?॥

**(३४३ आक्षेपवार्तिकम् ॥८॥)**

**॥*॥ उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः॥*॥**

**(भाष्यम्)**

उरण् रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषो भवति॥

के पुनरुदात्तादयः?॥

उदात्तानुदात्तस्वरितानुनासिकाः। कृतिः हृतिः, कृतं हृतम्, प्रकृतं प्रहृतम्, नॄँ पाहि॥

**(द्वितीयपक्षाभ्युपगमभाष्यम्)**

अस्तु तर्ह्युः स्थाने अण् चानण् च अण् तु रपर इति॥

**(३४४ द्वितीयपक्षदूषणवार्तिकम् ॥९॥)**

**॥*॥ य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णप्रतिपत्तिः॥*॥**

य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः। कर्ता हर्ता वार्षगण्यः॥

**(द्वितीयपक्षदूषणशेषाक्षेपभाष्यम्)**

किं हि साधीयः- ऋवर्णस्यासवर्णे यदवर्णः स्यात्, न पुनरेङैचौ?॥

**(द्वितीयपक्षवादिभाष्यम्)**

पूर्वस्मिन्नपि पक्षे एष दोषः। किं हि साधीयस्तत्रापि ऋवर्णस्यासवर्णे यदवर्णः स्यात्, न पुनरिकारोकारौ॥

**(प्रथमपक्षवादिभाष्यम्)**

आनङ्-होतापोतारौ। आनङ्।

अनङ्-कर्ता हर्ता। अनङ्।

रीङ्-मात्रीयति पित्रीयति। रीङ्॥

रिङ्-क्रियते ह्रियते। रिङ्॥

**(३४७ आक्षेपबाधकवार्तिकम् ॥ ३॥)**

**॥*॥ उदात्तादिषु च॥*॥**

**(भाष्यम्)**

उदात्तादिषु च॥

किम्?॥

रपरत्वस्य प्रतिषेधो वक्तव्यः॥ कृतिः हृतिः।

कृतं हृतम्। प्रकृतम् प्रहृतम्। नृषाहि॥ तस्मादण्ग्रहणं कर्तव्यम्॥

**(एकदेशे रपरत्वसाधकाधिकरणम्)**

**(३४८ आक्षेपवार्तिकम् ॥ ४॥)**

**॥*॥ एकादेशस्योपसंख्यानम्॥*॥**

**(भाष्यम्)**

एकादेशस्योपसंख्यानं कर्तव्यम्॥ खट्वर्श्यः मालर्श्यः॥

किं पुनः कारणं न सिद्ध्यति?॥

उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। न चायमुरेव स्थानेऽण् शिष्यते॥

किं तर्हि?।

ननु च यस्याप्यनन्तरस्य विधिं प्रति स्थानिवद्भाव; तस्याप्यनन्तरलक्षणो विधिः संयोगसंज्ञा विधेया॥

**(३९८ समाधानवार्तिकम् ॥२॥)**

**॥*॥ न वा संयोगस्यापूर्वविधित्वात् ॥*॥**

**(भाष्यम्)**

न वा एष दोषः॥

किं कारणम्?।

संयोगस्यापूर्वविधित्वात्। न पूर्वविधिः संयोगः॥

किं तर्हि?॥

पूर्वपरविधिः संयोगः॥

**(एकादेशे स्थानिवद्भावसाधनम्)**

**( ३९९ आक्षेपवार्तिकप्रथमखण्डम्)**

**॥*॥एकादेशस्योपसंख्यानम् ॥*॥**

**(भाष्यम्)**

एकादेशस्योपसंख्यानं कर्तव्यम्। श्रायसौ, गौमतौ, चातुरौ, आनडुहौ, पादे, उदवाहे। एकादेशे कृते नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति॥

**(प्रत्याक्षेपभाष्यम्)**

किं पुनः कारणं न सिध्यन्ति?॥

**(प्रत्याक्षेपबाधकवार्तिकम्)**

तत्र को दोषः?॥

'तत्र प्रत्ययलक्षणप्रतिषेधः'॥ तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। 'ह्रस्वस्य पिति कृति तुग्' भवति इति तुक् प्राप्नोति॥

**(४३४ समाधानवार्तिकम् ॥३॥)**

**॥*॥ सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञत्वात् ॥*॥**

**(भाष्यम्)**

सिद्धमेतत् ॥

कथम्?।

प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम् ॥

**(आक्षेपभाष्यम्)**

यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते, ग्रामणीः सेनानीः-अत्र वृद्धिः प्राप्नोति॥

**(समाधानभाष्यम्)**

प्रसक्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य॥

**(प्रसक्तादर्शनवादिन आक्षेपभाष्यम्)**

यदि षष्ठीनिर्दिष्टस्येत्युच्यते 'चाहलोप एवेत्यवधारणम्' 'चादिलोपे विभाषा' अत्र लोपसंज्ञा न प्राप्नोति॥

**(षष्ठीनिर्दिष्टवादिन आक्षेपभाष्यम्)**

अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत् सिद्ध्यति?।

**(प्रसक्तादर्शनवादिनः समाधानभाष्यम्)**

को हि शब्दस्य प्रसङ्गः? यत्र गम्यते चार्थो, न च प्रयुज्यते॥

**(उपसंहारभाष्यम्)**

अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव॥

**(आक्षेपस्मारणभाष्यम्)**

कथं ग्रामणीः सेनानीः?।

**(समाधानभाष्यम्)**

योऽत्राऽणः प्रसङ्गः क्विपाऽसौ बाध्यते। अदर्शनं लोपः॥६०॥

**(५५-लुक्श्लुलुप्संज्ञासूत्रम् ॥१।१।९ आ. २ यं सू.॥)**

## प्रत्ययस्य लुक्श्लुलुपः॥१।१।६१॥

**(प्रत्ययपदप्रयोजनाधिकरणम्)**

**(आक्षेपभाष्यम्)**

प्रत्ययग्रहणं किमर्थम्?॥

**(४३५ समाधानवार्तिकम् ॥१॥)**

### ॥*॥ लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम् ॥*॥

**(भाष्यम्)**

लुमति प्रत्ययग्रहणं क्रियते, अप्रत्ययस्यैताः संज्ञा मा भूवन्निति॥

**(भाष्यम्)**

किं प्रयोजनम्?॥

वाक्यपदयोरन्त्यस्येत्येवं तत् ॥

**(आक्षेपभाष्यम्)**

इह तर्हि-दधिसेचौ-दधिसेचः इति 'सात्पदाद्योः' इति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति॥

**(समाधानभाष्यम्)**

मा भूदेवम्-पदस्यादिः पदादिः, पदादेर्नेति॥

कथं तर्हि?॥

पदादादिः पदादिः, पदादेर्नेत्येवं भविष्यति॥

**(आक्षेपभाष्यम्)**

नैवं शक्यम् । इहापि प्रसज्येतऋक्षु-वाक्षु-त्वक्षु-कुमारीषु किशोरीष्विति॥

**(समाधानभाष्यम्)**

सात्प्रतिषेधो ज्ञापकः-स्वादिषु पदत्वेन येषां पदसंज्ञा, न तेभ्यः प्रतिषेधो भवतीति॥

**(आक्षेपभाष्यम्)**

इह तर्हि- 'बहुसेचौ, बहुसेचः' बहुजयं प्रत्ययः॥ अत्र पदादादिः पदादिः, पदादेर्नेत्युच्यमानेऽपि न सिध्यति॥

**(वार्तिकन्यासान्तरेण समाधानभाष्यम्)**

एवं तर्हि-

**(वार्तिकन्यासभाष्यम्)**

**॥*॥ उत्तरपदत्वे च पदादिविधौ॥*॥**

**(भाष्यम्)**

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्ययको भवति, न संप्रतीयमानः। तद्यथा-ऋगित्युक्ते संपाठमात्रं गम्यते, नास्या अर्थो गम्यते॥

**(समाधानभाष्यम्)**

एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते॥

**(५०८ (१) समाधानबाधकवार्तिकप्रथमखण्डम् ॥)**

**॥*॥ वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः॥*॥**

**(भाष्यम्)**

वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः॥

**(आक्षेपभाष्यम्)**

किं परा सूत्रात् क्रियत इत्यतोऽवरकाला?।

**(समाधानभाष्यम्)**

नेत्याह। सर्वथाऽवरकालैव। वर्णानामुपदेशस्तावत्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल 'आदिरन्त्येन संहेता' इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा॥ सवर्णसंज्ञोत्तरकालम् 'अणुदित्सवर्णस्य चाप्रत्ययः' इति। सैषाऽवरकाला-उपदेशोत्तरकाला वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यत इत्येतन्न॥

**(५०८ (२)समाधानबाधकवार्तिकद्वितीयखण्डम् ॥॥)**

**॥*॥ तस्मादुपदेशः॥*॥**

**(भाष्यम्)**

तस्मादुपदेशः कर्तव्यः॥

'व्यपपदेशिवद्भावोऽप्रातिपदिकेन'॥

**(आक्षेपभाष्यम्)**

किं पुनः कारणं 'व्यपदेशिवद्भावोऽप्रातिपदिकेन'॥

**(समाधानभाष्यम्)**

इह सूत्रान्ताट्ठग्भवति, दशान्ताड्डो भवतीति केवलादुत्पतिर्मा भूदिति॥

**(समाधानबाधकभाष्यम्)**

नैतदस्ति प्रयोजनम्। सिद्धमत्र तदन्ताच्च तदन्तविधिना, केवलाच्च व्यपदेशिवद्भावेन। सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः-सूत्रान्तादेव, दशान्तादेवेति॥

**(समाधानसाधकभाष्यम्)**

नात्र तदन्तादुत्पत्तिः प्राप्नोति। इदानीमेव ह्युक्तम्*समासप्रत्ययविधौ प्रतिषेधः*इति॥

**(गौरवाक्षेपभाष्यम्)**

सा तर्ह्येषा परिभाषा कर्तव्या॥

**(गौरवनिराकरणभाष्यम्)**

न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयतिव्यपदेशिवद्भावोऽप्रातिपदिकेन'-इति। यदयम्- 'पूर्वादिनिः' 'सपूर्वाच्च' इत्याह॥

**(ज्ञापकनिराकरणभाष्यम्)**

नैतदस्ति ज्ञापकम्॥ अस्ति ह्यन्तदेतस्य वचने प्रयोजनम्॥

किम्?॥

सपूर्वादिनिं वक्ष्यामीति॥

